International Journal of Sanskrit Research 2022; 8(4): 159-162

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(4): 159-162
© 2022 IJSR
www.anantaajournal.com
Received: 22-04-2022
Accepted: 11-06-2022

**सौरभ राय**
शोधछात्र, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालयः नई दिल्ली, भारत

**Corresponding Author:**
**सौरभ राय**
शोधछात्र, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालयः नई दिल्ली, भारत

# रसास्वादविषये रसवादेन सह कैथार्सिस्-तत्वस्य तुलनात्मकमध्ययनम्

**सौरभ राय**

## प्रस्तावना

रसो वै सः, रसं ह्येवायं लव्ध्वाऽऽनन्दी भवति। (तैत्तिरीयोपनिषद्)

विश्वजगतः मूलसारं भारतीयमहर्षिभिः ब्रह्म नाम्ना अभिहितम्, उपनिषदि यः रसात्मकः आनन्दस्वरूपः। ब्रह्मोपलव्दि हि परमानन्दप्राप्तिः। अस्य आनन्दबोधस्य दिशः साहित्यतत्त्वं उद्भावयति। शिल्पकलायाः सृष्टिः मुख्यतया आनन्दलाभाय भवति। कदाचिद् इदं कवेः स्वार्थाय कदाचिद् परार्थाय सहृदयजनाय च। कोऽपि काव्यश्रवनात् दर्शनाद्वा सहृदयजनः यदि आनन्दानुभवति तर्हि काव्यकर्तुः सफलता, निरानन्दे च व्यर्थता - 'आ परितोषाद् विदुषां साधु न मन्ये प्रयोगविज्ञानम्' [1] । काव्याद् नाट्याद् च इदम् आनन्दलाभं साहित्यकलायां रसतत्त्वे वा रसास्वादनम् इति अभिधीयते। प्राच्ये रसविषये यादृशः व्याख्या आलोचना अस्ति तादृशः न तु पाश्चात्ये भवति। प्राच्ये साहित्यरसविषये आचार्यभरतकृतनाट्यशाश्त्रम् एव प्रथमप्रमानम्, पाश्चात्ये तु अरस्तुः (Aristotle) कृतः पोयेटिकस् (Poetics) । यद्यपि ग्रन्थद्वयोर्मध्ये रसविषये सुवृहत्व्याख्या न प्राप्नोति तथापि प्राच्य-पाश्चात्ययोः रसस्य मूलसूत्रः तयोः ग्रन्थकद्वयोर्मध्ये निहितास्ति। रसास्वादनस्य पन्थानं कथं सुगमं भवेत्, तदुद्देश्येन नाट्यशास्त्रे रसविकल्प इति षष्ठाध्याये भावव्यञ्जक इति सप्तमाध्याये च आलोचनामस्ति। अरस्तूना रसवविषये विस्तृतव्याख्यां न कुरुते। किन्तु Poetics ग्रन्थे ट्राजेडिः (Tragedy) इति आलोचनाप्रसङ्गे भयशोकहास्यश्च (Pity, Fear, Comedy) इति आलोचनामाध्यमेन रसतत्वस्य प्रतिष्ठाम् अकरोत्। दर्शकाभिः नाट्यात् रसस्वादविषयं किञ्चित् आलोच्यते। नाट्यशास्त्रस्य रसोत्पत्तिविषयकः उक्तिः – 'विभावानुभावव्याभिचारिसंयोगात् रसनिष्पत्तिः[2]' इति मतवादं गृहीत्वा रसप्रस्थानस्य उद्भवः भवति। पुनः पाश्चात्ये अरस्तोः (Aristotle) ट्राजेडिः (Tragedy) अस्य संज्ञायाम् -'.... Trough pity and fear effecting proper purgation of this emotions.'[3] इति वक्तव्यं गृहीत्वा कैथार्सिस् (Catharsis) तत्त्वम् उद्भावयति।

---

[1] अभिज्ञानशकुन्तलम्-१.२

[2] नाट्यशास्त्रम् -६/३२

[3] पोयेटिकस्,षष्ठाध्यायः

पूर्वे रसवविषये वहवः पन्डिताः ग्रन्थ-भाष्य-आलोचना-समालोचना-गवेषणापत्रानि प्रकाशयन्ति। तत् दृष्ट्वा मया कृतं रसास्वादनविषये इदं गवेषणापत्रम् अपूर्वमिति न मन्ये। गवेषणाप्रस्तावे रसवादस्य क्याथारसिस्-तत्तवस्य च मध्ये निरपेक्षदृष्टितया सहृदयजनैः कीदृशं रसास्वादनं रसग्रहनं च सम्पाद्यते? केन प्रकारेण सुधीजनं रसास्वादनम् प्रभावयति? रसास्वादनस्य फलं किम्? एतद्विषये व्याख्या प्रस्तुयते। एतद्व्यातीत तत्त्वद्वयोर्मध्ये रसास्वादनविषये समतागवेषणम् इति गौणोद्देश्यम् अस्ति।

पुराकालाद् अधुना यावत् काव्यशास्त्रकाराः सहृदयजननिकटे साहित्यं नान्दनिकविषयरूपेण प्रतिष्ठायै चेष्टयन्ति । तत्हेतुः काव्यशास्त्रस्य साहित्यतत्त्वस्य वा विषयानि स्पष्टरूपेण आलोचयन्ति। आलोचनायाः कारणं यत् सामाजिकाः सहृदयाः काव्यतत्त्वान् ज्ञात्वा काव्याद् आनन्दलाभाय समर्थाः भवन्ति। काव्यशास्त्रकाराः काव्यविषयानां स्पष्टीकरणेन कवेर्भावनं सहृदयानां भावनया सह एकात्मकरणाय चेष्टयन्ति। येन कवेः कल्पनानि सहृदयेषु सञ्चारणे न अवरुन्द्धे। अत्र रसप्रस्थानस्य कैथार्सिस्-तत्त्वस्य च प्रेक्षितया रसास्वादनं व्यापारं स्पष्टिकरणस्य चेष्टियते । येन सहृदयजनस्य रसास्वादनस्य पन्था सुगमः प्रशस्तः च भुत्वा साहित्यं सफलतामर्जेत्।

**रसवाद** - आचार्यभरतस्य नाट्यशाश्त्रस्य षष्ठाध्यायस्य - 'विभावानुभावव्याभिचारिसंयोगात् रसनिष्पत्तिः' वाक्यमिदं रससूत्रः इति कथितम्। वाक्यात् रसनिष्पत्तिः विषये सम्यक् न वोध्यते। विभाव-अनुभाव-व्याभिचारिः कः? संयोगः शव्दस्यार्थः किम्? रसनिष्पत्तिः इति किं वोध्यते? इत्यादि प्रश्नस्य सम्यग् उत्तरम् अत्र न प्राप्यते। किन्तु नाट्यशास्त्रस्य गभीराध्ययनेन रसविषये परवर्तीकालस्य अध्ययनेन च सर्वेषां प्रश्नानाम् उत्तराणि प्राप्यन्ते। विभावः द्विविधः। आलम्वन-उद्दीपनश्च। यम् अवलम्व्य रत्यादिनां उद्भवः भवति स आलम्वनविभावोच्यते। रत्याद्युद्दिपनाय यः साहाय्यं करोति स उद्दीपनविभावः। अनुभाव इति अनुकार्यम्। व्यभिचारिभावः सञ्चारिभावः वा सहकारितुल्यम् (विशेषाद् अभिमुख्येन चरन्तो व्याभिचारिणः)[4]।

रस आस्वादनस्नेहयोः। य आस्वादनयोग्य सः हि रसः। रस्यते आस्वाद्यते। नाट्यशास्त्रे - 'रस इति कः पदार्थः? उच्यते - आस्वाद्यत्वात्।' अस्मिन् विषये लौकिकोदाहरणं प्रस्तौति- मनुष्यलोके व्यञ्जनसहयोगे अन्नगृहीत्वा खाद्यरसास्वादं कृत्वा सुखम् अनुभवति। तादृशः वागङ्गादि अभिनयेन अभिव्यक्तः स्थायीभावादि आस्वाद्य आनन्दम् अनुभवति । अस्थूलत्वात् काव्यरसस्य आस्वादनम् न सम्भवति। तन्न, काव्ये रसास्वादनम् इति प्रयोगं लाक्षणिकार्थे गौनार्थै वा, न तु अभिधार्थे मुख्यार्थे वा। काव्ये रसास्वादनम् अन्तःकरणतया मानसिकरूपेण सम्भवति। पार्थिवः रससंख्या षट् (मधुराम्लकटुकषायतिक्तलवणाश्च)। काव्यरसस्य संख्या नाट्यशाश्त्रे नवः (शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाः। वीभत्साद्भूतसंज्ञो चेत्यष्टो नाट्यरसास्मृताः।।[5]) । शान्तवात्सलश्च ग्रहने रसाः दशधाः। मम्मटमते शान्तः नवमरसः। विश्वनाथमते वात्सल्यः दशमरसः। उपर्युक्तं विभावानुभावव्याभिचारि-संयोगात् स्थायीभावाः रसे परिणताः भवन्ति। स्थायीभावः –

> अविरुद्धा विरुद्धा वा यं तिरोधातमक्षमाः।
> आस्वादङ्कुरस्कन्धोऽसौ भवः स्थायीति सम्मतः।। [6]

आचार्याभिनवगुप्तानुसारे स्थायीभावाः मनुष्यनाम् आजन्मप्राप्ताः। व्यञ्जन-ओषधि-द्रव्यस्य सम्यक् मिश्रणे यः षड् लौकिकरसः उत्पन्नं भवति, (सः परिचितमधुरादि भिन्नाभिनवः)।एतात्दृशः विभावादिसंयोगेन यः रससृस्टिः भवति सः रत्यादिस्थायीभावाद् भिन्न अपूर्वः। वहुप्रकारणां विभावानुभावव्याभिचारीणां फलस्वरुपं लोकचित्ते सहृदयचित्ते स्थायीभावाः प्रकटं भवन्ति। अनेन प्रकारेण प्रकटमानानां स्थायीभावानाम् आस्वाद्यता हि केवलं फलम्। आस्वाद्यत्वात् एतानि स्थायीभावानि रसे परिणताः भवन्ति। एषां रसानाम् आस्वादनं सहृदयाः (येषां कव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते सहृदयसंवादभाजः सहृदयाः)[7] उपविष्ठाः दर्शकासने सभ्यगणाः वा कुर्वन्ति।

अधुना प्रश्नं यत् यानि स्थायीभावानि रसरूपेण प्रतीयते, तानि स्थायीभावानि कस्य? रामादि काव्यचरित्राणां, रामादि चरित्रस्य अभिनेतानां, सहृदयानां वा?, केन प्रकारेण आस्वाद्यते? एतद्विषये रसवादीनां मध्ये भिन्नमतानि सन्ति। आचार्यभट्टलोल्लटानुसारेण स्थायीभावानि मुख्यरूपेण काव्यस्य रामादिचरित्रेषु सन्ति।

[4] साहित्यदर्पणः, ३/१४६

[5] नाट्यशाश्त्रम्, ६/१५

[6] साहित्यदर्पणः, ३/१८३

[7] ध्वन्यालोकलोचनम्,१/१

गौणरूपेण रामादिचरित्रस्य अभिनेतानां मध्ये सन्ति। सामाजिकेषु रसस्य स्थिति अस्थायिरूपेण विद्यन्ते। आचार्यशङ्कुकानुसारेण सहृदयाः नाट्यादिचरित्रेण सह रामाद्यभिनेतानामभेदकल्पनं कुर्वन्ति। इदम् अभेदज्ञानं लौकिकज्ञानाद् पृथक्। श्रीशंकुकेन अस्मिन् विषये चित्रतुरगः न्यायः इति उदाहृतम्। नाट्यचरित्रस्य निपुणानुकरणेन सहृदयाः अभिनेतागणेषू रत्यादिनाम् अनुमीयन्ते। (सहृदयजनस्य संस्कारः यदा ते रत्यादयः मानसिकरूपेण आस्वाद्यन्ते तदा रतिप्रभृतयः इति रसाः)। सः रसस्थिर्तिं पूर्णरूपेण सामाजिकेषु न स्वीकरोति। येन प्रकारेण पर्वते धूमप्रत्यक्षे अग्नेः ज्ञानम् अनुमीयते तेन प्रकारेण अभिनेतृषु रत्यादेः प्रत्यक्षे सहृदयाः रसानुमीयन्ते। आचार्यभट्टनायकानुसारे सामाजिकाः प्रथमे अभिधाशक्त्या वाच्यार्थम् अनुधावन्ति। तदनन्तरं भावकत्तेन व्यापारेण रामादिचरित्रस्य भावनया सह स्वस्य भावनायाः तादात्म्यं कुर्वन्ति। अनेन व्यापारेण रामादिपात्रः स्वस्य व्याक्तित्वं त्यक्त्वा साधारणीकरणं स्याद् । अस्याम् अवस्थायां गमित्वा सामाजिकानां रज-तमगुणस्य विलुर्त्तिं भवति। केवलं हि सत्त्वगुणेन रसास्वादनं भवति। मतवादमिदं मनस्तात्तिकानां सम्मतम्। साधारणीकरणम् इति तत्त्वस्य सम्यक् व्याख्या अत्र न प्राप्यते। आचार्याभिनवगुप्तानुसारे रसः = व्यङ्गः, विभावादि = व्यञ्जकः। काव्यपाठे अभिनयदर्शने वा सहृदयजनः प्रथमे विभावादि-प्रभतिषु विषयेषु ज्ञानं लभ्यते। अनन्तरं साधारणरूपे प्रतीयमानविभावादिनां माध्यमेन सहृदयस्य स्थायीभावः उद्वुद्ध्यते। एषां स्थायीभावानां प्रतीतिः साधारणरूपे स्याद्। एतेन यदा नायकनिष्ठरत्यादि अभिव्यक्तः भवति तदा सहृदयानामपि रत्याख्यभावाः उद्भवं भवन्ति। इमे भावाः सहृदयेन रसस्येव आस्वाद्यते। आस्वद्यमान वस्तुः ज्ञानं वा हि रसः। इदम्मतं परवर्तीकाले पण्डितैः सर्वपेक्षा गृह्यते।

कैथार्सिस्-वाद (Catharsis) - 'Tragedy, than ,is an imitationof an action that is serious, complete,an of a certain magnitude; in language embellished with each kind of artistic ornament, the several kinds being found separate parts of the play; in the form of action,not of nararative; Trough pity and fear effecting proper purgation of this emotions.' [8]

**पाश्चात्यकाव्यबुध-दार्शनिक-राजनीतिविद्-**
समाजतत्त्वज्ञारस्तुना ट्राजेडि इत्यस्य लक्षणनिरुपणावसारे उपर्यूक्तवाक्यांशोऽयम् उच्यते। वाक्यांशं गृहीत्वा पाश्चात्ये रसविषयकं कैथार्सिस् इति तत्त्वम् उत्पद्यते। कैथार्सिस् प्राचीन-ग्रिक-शव्दोऽस्ति । यस्य प्रचलितार्थः शूद्धिकरणम्। चिकित्साशास्त्रे पारिभाषिकार्थेऽपि अस्य व्यवहारः दृश्यते। कैथार्सिस् तत्त्वे शोकः (Pity) भयः (Fear) च द्वयोः रसयोः मुख्यरूपेण आलोचना अस्ति। दुःखस्य विषयं यत् अरस्तुमहोदयेन कैथार्सिस्सम्बन्धे स्वीयग्रन्थे वीज इव सूत्रसदृशम् आलोचयति। सूत्रवद् तदल्पविषयं परवर्तीकालस्य पण्डिताः स्वीय स्वीय दृष्टिभङ्ग्या व्याख्यां कुर्वन्ति। मुख्यतः त्रीणि मतानि प्रसिद्धाः सन्ति। अत्र एतत्विषये आलोचयामः।

1. अनेकपणडिताः कैथार्सिस् इति पदं चिकित्साशास्त्रस्य पारिभाषिकार्थं मानसिकपरिषोधनार्थं च गृहीत्वा व्याख्यां कुर्वन्ति। चिकित्साशास्त्रे शारीरिकसुस्थतायै देहस्य जलीयपदार्थानां भारसाम्यरक्षा अवश्यकर्तव्या। देहादतिरिक्तं जलीयपदार्थानां निष्काशने शरीरः सुस्थताम् अर्जयति। ट्राजेडि इति दर्शनकाले शोकभययुक्तं च (Pity & Fear) घटनानुकरणेन दर्शकजनस्य हृदि भयशोकयोः उद्भवः करोति। तेन ट्राजेडि दर्शकानां कुप्रवृत्तिनां जागरण-प्रशमनश्च कृत्वा सामाजिकानां नैतिकमानं उन्नीतं करोति ।
2. ट्राजेडि इति दर्शनकाले शोकस्य भयस्य च वहुपरिमाणे उद्भवं भवति। एतेन मनस्यभ्यन्तरे सञ्चितान् वेदनानुकम्पाविद्रहादिभावान् प्रशमन्ति। ट्राजेडि इत्यस्य करुणभयानकदृश्यादिन् दृष्ट्वा सामाजिकानां मनसां दुर्वलानुभूतीन् प्रकम्प्य निर्गमयति। तेन फलस्वरुपेण सहृदयजनानां नागरिकानां वा मनः शुद्धं जातम्। नाट्यदर्शनाद् जातोल्लासेन हर्षेण वा मनः स्वाभाविकतां लभ्यते । तस्मात् तत्त्वमिदं विशुद्धिकरणम् इति अभिधीयते। अध्यापकः लेसिं (Lesing), गिलवार्ट (Gilbert) आदि अस्य मतस्य समर्थकाः।
3. कापि पण्डिताः कैथार्सिस् तत्त्वं शैल्पिकदृष्टितया व्याख्यां कूर्वन्ति। यया विशेषप्रक्रियया भयशोकश्च आह्लादे विपरिणमते सा एव कैथार्सिस्। अतः कैथार्सिस् एका शैल्पिकप्रक्रिया या साहित्यानन्देन काव्यानन्देन वा सहयुक्तमस्ति।

रसास्वादनविषये द्वयोमतयोः आलोचनायां दृश्यते यत् भारतीयारसतत्त्ववुधाः मन्यन्ते रसस्य साक्षात्फलम् आनन्दलाभम्। अर्थाद् रसः आनन्दस्वरूपम्। तदा हि रसस्य सार्थकता यदा स आस्वादितं भूत्वा सहृदयजनान् नन्दयति। प्रसङ्गेऽस्मिन् उक्तं – 'आनन्दनिष्यन्दिषु रूपकेषु फलम्'[9]। रसवादे रसोत्पत्तिविषये सूक्ष्मातिसूक्ष्मव्यापारस्यापि आलोचनोपलभ्यते। सत्कर्मणः अवश्यमेव सत्फलं जायते। ततः रसवादे रससृष्टिविषये सुगभीर-सुचिन्तित-सुनिपुण-रसतत्त्वस्य उद्भवः सम्भवति। धान्यादि भोग्यानां भोगे हि सार्थकता। तेनैव रसास्वादने हि रसस्य पूर्णता।

---

[8] Aristotle, Poetic, chapter vi

[9] दशरूपकम्, १/६

अरस्तुमहोदयस्य कैथार्सिस् (Catharsis) तत्त्वेऽपि सामाजिकानां सहृदयानां दर्शकानां वा मनश्चित्ते ट्राजेडि (Tragedy) इति दर्शनकाले भयशोकयोः (Fear & Pity) उद्भावयति। सैव पूर्णरूपेण नास्वीकार्या यत् भावमोचनेन भावशुद्धिकरणेन वा दर्शकानां मनस्यपि स्वस्तिः प्राप्यते। अस्मिन्विषये पण्डिताः सहमतानि पोषयन्ति। रसवादे रसास्वादनस्यानन्दं कैथार्सिस्तत्त्वस्य मानसिकस्वस्तिः च समगोत्रीयः समपर्यायवाचकः च । अयमानन्दो प्राच्ये लोकत्तरः अलौकिकः वा। एकस्मिन् तत्त्वे धार्मिक-दृष्टितया मानसिकपवित्रकरणस्योपरि गुरुत्तम् आरोपयति। अन्यस्मिन् तत्त्वे मानसिकस्वास्थ्यस्योपरि गुरुत्वं प्रदर्शयति। ट्राजेडि इति पाठं दर्शनं वा न धर्माचरणं नापि चिकित्सा, सैव शिल्पकलायाः रसस्वादनं प्रक्रिया। ट्राजेडि अस्य क्याथारसिस्तत्त्वस्य सरलार्थं न केवलं शोककरुणादिसमजातीय-अनुभुतिनां जागरणं निष्क्रमनञ्च, तत्र मुख्यरूपेणानन्दोऽपि विद्यते। कैथार्सिस्-विषये व्याख्येयं शुद्धिकरणाद् पवित्रकरणाद् वा अधिकाग्रहनीया। अयं शैल्पिकानन्दः लौकत्तरोऽलौकिकः वा। अतः करुण-वीभत्स-भयानकादयः सर्वे रसाः आस्वाद्यमानाः आनन्दस्वरूपाः। लौकिके कोऽपि जनः शोकं दुःखं वा नेच्छति। किन्तु करुणरसस्य ट्राजेडि (Tragedy)-नाटकं पाठकाले दर्शनकाले वा रसमास्वाद्यते, पुनःपुनः द्रष्टुं श्रोतुमिच्छति।

'करुणादावपि रसे जायते यत् परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम्।'[10]

**ग्रन्थपञ्जी**


1. काव्यजिज्ञासार रूपरेखा, ड. दास करुणासिन्धु, रत्नावली, २०१२.
2. आरिस्टटलेर पोयेटिकस् ओ साहित्यतत्त्व, भट्टाचार्य साधनकुमार, वङ्गाव्द १३७५.
3. भरत नाट्यशाश्त्र, ड. वन्द्योपाध्याय सुरेशचन्द्र, नवपत्र प्रकाशन, २०१८.
4. काव्यप्रकाशः, डा. सिंह सत्यव्रत, चौखाम्वा विद्याभवन प्रकाशन, २०१६.
5. साहित्यदर्पणः, विद्यावाचस्पति-साहित्याचार्य-शालिग्रामशाश्त्रि, मोतीलाल बनारसीदास, २०१६.
6. ध्वन्यालोकः, पाठक आचार्यजगन्नाथः, चौखाम्वा विद्याभवन, २०१४.
7. रसगङ्गाधरः (प्रथमाननम्), पण्डितः झा मदनमोहन, चौखाम्वा विद्याभवन, २०१६.
8. रस ओ भाव, शाश्त्री अशोकनाथ, संस्कृत पुस्तक भान्डार, वङ्गाव्द १४०५.
9. मम्मट भट्टेर काव्यप्रकाश (१-६ उल्लस), ड. आचार्य रामानन्द, संस्कृत पुस्तक भान्डार, १४२२.
10. साहित्यदर्पण (षष्ठ उल्लास), ड. वन्द्योपाध्याय उदयचन्द्र, संस्कृत वुक डिपो, कलिकाता, २०१७.
11. पाश्चात्य साहित्यतत्त्व ओ साहित्यभावना, सेन नरेंद्र, रत्नावली, कलकाता, २००९.


[10] साहित्यदर्पणः, ३/६३